कैटभजित् ३७ विधुः ३८ श्रीवत्सलाञ्छनः ३९। इत्यमरः। पुराणपुरुषः ४० वृष्णिः ४१ शतधामा ४२ गदाग्रजः ४३ एकशृङ्गः ४४ जगन्नाथः ४५ विश्वरूपः ४६ सनातनः ४७ मुकुन्दः ४८ राहुभेदी ४९ वामनः ५० शिवकीर्त्तनः ५१ श्रीनिवासः ५२ अजः ५३ वासुः ५४। इति जटाधरः। श्रीहरिः ५५ कंसारिः ५६ नृहरिः ५७ विभुः ५८ मधुजित् ५९ मधुसूदनः ६० कान्तः ६१ पुरुषः ६२ श्रीगर्भः ६३ श्रीकरः ६४ श्रीमान् ६५ श्रीधरः ६६ श्रीनिकेतनः ६७ श्रीकान्तः ६८ श्रीशः ६९ प्रभुः ७० सुरलोधरः ७१ जगदीशः ७२ गदाधरः ७३ नन्दात्मजः ७४ नरसिंहः ७५ हरीशः ७६ गोपालः ७७ नन्दनन्दनः ७८ नरकजित् ७९ सामगर्भः ८० अजितः ८१ जितामित्रः ८२ ऋतधामा ८३ शशबिन्दुः ८४ पुनर्व्वसुः ८५ आदिदेवः ८६ श्रीवराहः ८७ सहस्रवदनः ८८ त्रिपात् ८९ ऊर्द्धदेवः ९० हरिः ९१ पृथुः ९२ यादवः ९३ अरिष्टसूदनः ९४ पूतनारिः ९५ सदायोगी ९६ ध्रुवः ९७ चाणूरसूदनः ९८ हेमशङ्खः ९९ शतावर्त्ती १०० कालनेमिरिपुः १०१ धेनुकारिः १०२ सोमसिन्धुः १०३ विरिञ्चिः १०४ धरणीधरः १०५ बहुमर्द्दा १०६ वर्द्धमानः १०७ शतानन्दः १०८ हयान्तकः १०९ मधुरेशः ११० द्वारकेशः १११ रन्तिदेवः ११२ वृषाकपिः ११३। इति शब्दरत्नावली। जिष्णुः ११४ दाशार्हः ११५ अब्धिशयनः ११६ इन्द्रावरजः ११७ नरायणः ११८ जलशयः ११९ यज्ञपुरुषः १२० तार्क्ष्यध्वजः १२१ षड्‌बिन्दुः १२२ पद्मेशः १२३ मार्जः १२४ जिनः १२५ कुमोदकः १२६ जह्नुः १२७ वसुः १२८ शतावर्त्तः १२९ सुप्रकेशो १३० बभ्रुः १३१ वेधाः १३२ पृश्निशृङ्गः १३३ आत्मभूः १३४ पाञ्चायनः १३५ सुवर्णबिन्दुः १३६ श्रीवत्सः १३७ देवकीसुतः १३८ गोपेन्द्रः १३९ गोवर्द्धनधरः १४० यदुनाथः १४१ गदाभृत् १४२ शार्ङ्गभृत् १४३ चक्रभृत् १४४ श्रीवत्सभृत् १४५ शङ्खभृत् १४६ ॥*॥ अस्य वध्यादयो यथा,—

"मधुधेनुकचाणूरपूतनायमलार्ज्जुनाः।
कालनेमिहयग्रीवशकटारिष्टकैटभाः॥
कंसः केशिमुरौ साल्वमैन्दद्विविदराहवः।
हिरण्यकशिपुर्ब्बाणः कालीयो नरको बलिः॥
शिशुपालश्चास्य वध्या वैनतेयस्तु वाहनम्।
शङ्खोऽस्य पाञ्चजन्योऽङ्कः श्रीवत्सोऽसिस्तु
नन्दकः॥
गदा कौमोदकी चापं शार्ङ्गं चक्रं सुदर्शनम्।
मणिः स्यमन्तको हस्ते भुजमध्ये तु कौस्तुभः॥"
इति हेमचन्द्रः ॥*॥

तस्य शतनामानि पाद्मोत्तरखण्डे १९१ अध्याये सहस्रनामानि च महाभारतीयशान्तिपर्व्वणि १४९ अध्याये द्रष्टव्यानि ॥*॥ अस्य मन्त्रो वर्णश्च यथा,—

"स्वरमाद्यं द्वितीयञ्च उपान्त्यं चान्त्यमेव च।
वासुदेवो बलः कामो ह्यनिरुद्धो यथाक्रमम्॥
प्रणवस्तत् सदित्येतत् हुं चौं भूरतिमन्त्रकाः।
नारायणस्तथा ब्रह्मा विष्णुः सिंहो वराह-
राट्॥
सितारुणहरिद्राभा नीलश्यामललोहिताः।
मेघाग्निमधुपिङ्गाभा वर्णतो नव नायकाः॥"*॥

अस्याङ्गानि तेषां मन्त्रवर्णाश्च यथा,—

"कं टं षं शं गरुत्मानं स्याज्जं खं वं सुदर्शनम्।
खं चं फं षं गदादेवी ठं नं मं चाथ शङ्खकम्॥
घं टं भं हं भवेच्छ्रीश्च गं जं वं सञ्च पुष्टिकम्।
घं वं सं वनमाला स्याच्छ्रीवत्सं सं दं नं भवेत्॥
छं तं पं कौस्तुभः प्रोक्तश्चानन्तो ह्यहमेव च।
इत्यङ्गानि यथायोगं देवदेवस्य वै दश॥*॥
गरुडोऽम्बुजसङ्काशो गदा चैवासिताकृतिः।
पुष्टिः शिरीषपुष्पाभा लक्ष्मीः काञ्चनसन्निभा॥
पूर्णचन्द्रनिभः शङ्खः कौस्तुभश्चारुणद्युतिः।
चक्रं सूर्य्यसहस्राभं श्रीवत्सः कुन्दसन्निभः॥
पञ्चवर्णा मता माला ह्यनन्तो मेघसन्निभः।
विद्युद्रूपाणि चास्त्राणि यानि नोक्तानि वर्णतः॥
इति गारुडे ११ अध्यायः ॥*॥

तस्य जगत्पालनादिर्यथा,—

"रजोगुणमयं चान्यद्रूपं तस्यैव धीमतः।
चतुर्म्मुखः स भगवान् जगत्सृष्टौ प्रवर्त्तते॥
सृष्टञ्च पाति सकलं विश्वात्मा विश्वतोमुखः।
सत्त्वं गुणमुपाश्रित्य विष्णुर्व्विश्वेश्वरः स्वयम्॥
अन्तकाले स्वयं देवः सर्व्वात्मा परमेश्वरः।
तमोगुणं समाश्रित्य रुद्रः संहरते जगत्॥
एकोऽपि सन्महादेवस्त्रिधासौ समवस्थितः।
सर्गरक्षालयगुणैर्निर्गुणोऽपि निरञ्जनः॥
एकः सन् स द्विधा चैव त्रिधा च बहुधा पुनः।
त्रिधा विभज्य चात्मानं त्रैलोक्ये संप्रवर्त्तते॥
सृजते दीव्यते चैव ग्रसते च विशेषतः।
यस्मात् सृष्ट्वानुगृह्णाति ग्रसते च पुनः प्रजाः॥
गुणात्मकत्वात्त्रैलोक्ये तस्मादेकः स उच्यते।
अग्रे हिरण्यगर्भः स प्रादुर्भूतः सनातनः॥
आदित्वादादिदेवोऽसावजातत्वादजः स्मृतः।
देवेषु च महादेवो महादेव इति स्मृतः॥
पाति यस्मात् प्रजाः सर्व्वाः प्रजापतिरिति
स्मृतः।
बृहत्त्वाच्च स्मृतो ब्रह्मा परत्वात् परमेश्वरः॥
वशित्वादप्यवश्यत्वादीश्वरः परिभाषितः।
ऋषिः सर्व्वगतत्वेन हरिः सर्व्वहरो यतः॥
अनुत्पादात् चानुपूर्व्वात् स्वयम्भुरिति स स्मृतः।
नराणामयनं यस्मात् तस्मान्नारायणः स्मृतः॥
हरः संसारहरणाद्विभुत्वाद्विष्णुरुच्यते।
भगवान् सर्व्वविज्ञानादवनादोमिति स्मृतः॥
सर्व्वज्ञः सर्व्वविज्ञानाच्छन्दः सर्व्वमयो यतः।
शिवः स्यान्निर्म्मलो यस्माद्विभुः सर्व्वगतो
यतः॥
तारणात् सर्व्वदुःखानां तारकः परिगीयते।
बहुनात्र किमुक्तेन सर्व्वं विष्णुमयं जगत्॥"
इति कौर्म्मे ४ अध्यायः ॥*॥

अपि च।

मत्स्य उवाच।

"महाप्रलयकालान्तु एतदासीत्तमोमयम्।
प्रसुप्तमिव चातर्क्यमप्रज्ञातमलक्षणम्॥
अविज्ञेयमविज्ञातं जगत् स्थास्नु चरिष्णु च।
ततः स्वयम्भुरव्यक्तः प्रभवः पुण्यकर्म्मणाम्॥
व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः।
योऽतीन्द्रियः परो व्यक्तादणुर्ज्यायान् सनातनः॥
नारायण इति ख्यातः स एव स्वयमुद्बभौ।
स्वशरीरादभिध्यायन् सिसृक्षुर्व्विविधं जगत्॥
अप एव ससर्ज्जादौ तासु बीजमवासृजत्।
तदेवाण्डं समभवद्धैमरूप्यमयं महत्॥
संवत्सरसहस्रेण सूर्य्यायुतसमप्रभम्।
प्रविश्यान्तर्म्महातेजाः स्वयमेवात्मसम्भवः।
प्रभावादपि तद्व्याप्त्या विष्णुत्वमगमत् पुनः॥"
इति मात्स्ये २ अध्यायः ॥*॥

अस्य तिस्रो मूर्त्तयो यथा।

"सृष्टिस्थित्यन्तकरणात् ब्रह्मविष्णुशिवात्मिकाः।
स संज्ञां याति भगवान् एक एव जनार्द्दनः॥
ब्रह्मत्वे सृजते चैव विष्णुत्वे पाति नित्यशः।
रुद्रत्वे चैव संहर्त्ता एको देवस्त्रिधा स्थितः॥
स एव सृज्यः स च सर्गकर्त्ता
स एव पाता स च पाल्यते च।
ब्रह्माद्यवस्थाभिरशेषमूर्त्ति-
र्व्विष्णुर्व्वरिष्ठो वरदो वरेण्यः॥"
इति वह्निपुराणे सर्गानुशासननामाध्यायः ॥*॥

नारायणस्य मूर्त्तिविशेषो यथा।

"योऽसौ नारायणो देवः परात्परतरो नृप।
तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम॥
सृष्टा चेयं महासृष्टिः पालनीया मयैव हि।
कर्म्मकाण्डस्त्वमूर्त्तेन कर्त्तुं नैवेह शक्यते॥
तस्मात् मूर्त्तिं सृजाम्येकां यया पाल्यमिदं
जगत्।
एवं चिन्तयतस्तस्य सत्याभिध्यायिनो नृप॥
प्राक्सृष्टिजातं राजन् वै मूर्त्तिमत्तत्पुरो बभौ।
पुरोभूते ततस्तस्मिन् देवो नारायणः स्वयम्॥
प्रविशन्तं ददर्शाथ त्रैलोक्यं तस्य देहतः।
ततः सस्मार भगवान् वरदानं पुरातनम्॥
वागादीनां ततस्तुष्टः प्रादात्तस्य पुनर्व्वरम्।
सर्व्वज्ञः सर्व्वकर्त्ता त्वं सर्व्वलोकनमस्कृतः॥
त्रैलोक्यप्रतिपालश्च भव विष्णुः सनातनः।
देवानां सर्व्वदा कार्य्यं कर्त्तव्यं ब्रह्मणस्तथा॥
सर्व्वज्ञत्वञ्च भवतु तव देव न संशयः।
एवमुक्त्वा ततो देवः प्रकृतिस्थो बभूव ह॥
विष्णुरप्यधुना पूर्व्वां बुद्धिं सस्मार स प्रभुः।
तदा संचिन्त्य भगवान् योगनिद्रां महातपाः॥
तस्यां संस्थाप्य भगवान् इन्द्रियार्थोद्भवाः
प्रजाः।
ध्यात्वा परेण रूपेण ततः सुष्वाप वै प्रभुः॥
तस्य सुप्तस्य जठरान्महत् पद्मं विनिःसृतम्।
सप्तद्वीपवती पृथ्वी ससमुद्रा सकानना॥
तस्य मूलस्य विस्तारं पातालतलसंस्थितम्।